## प्राचामवृद्धात् फिन् बहुलम् । (१६०/११८४)

अवृद्धाच्छब्दरूपादपत्ये फिन् प्रत्ययो भवति [1]बहुलं प्राचां मतेन । ग्लुचुकायनिः । [2]अहिचुम्बकायनिः । प्राचाम् इति किम् ? ग्लौचुकिः । अवृद्धात् इति किम् ? राजदन्तिः । उदीचां प्राचामन्यतरस्यां बहुलम् इति सर्व एते विकल्पार्थास्तेषामेकेनैव सिध्यति । तत्राचार्यग्रहणं पूजार्थम् । बहुलग्रहणं वैचित्र्यार्थम् । क्वचिन्न भवत्येव, दाक्षिः । प्लाक्षिः ॥

## मनोर्जातावञ्यतौ षुक् च । (१६१/११८८)

मनुशब्दाद् अञ् यत् इत्येतौ प्रत्ययौ भवतः, [3]तत्सन्नियोगेन षुगागमः, समुदायेन चेज्जातिर्गम्यते । मानुषः, मनुष्यः । जातिशब्दावेतौ । अपत्यार्थोऽत्र नास्त्येव । तथा च मानुषाः इति बहुषु न लुग् भवति । [4]अपत्यविवक्षायां तु अणैव भवितव्यम् । मानवी प्रजा ।

अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः ।
नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः (म.भा. २.२६४) ॥

## अपत्यं पौत्रप्रभृति गोत्रम् । (१६२/१०८९)

पौत्रप्रभृति यदपत्यं तद् गोत्रसञ्ज्ञं भवति । सम्बन्धिशब्दत्वाद् अपत्यशब्दस्य [5]यदपत्यं तदपेक्षया पौत्रप्रभृतेर्गोत्रसञ्ज्ञा विधीयते । गर्गस्यापत्यं [5]पौत्रप्रभृति गार्ग्यः । वात्स्यः । अपत्यम् इति व्यपदेशोऽयं [6]पौत्रप्रभृतेः । पौत्रप्रभृति इति किम् ? अन्यस्य मा भूत् । [7]कौञ्जिः । गार्गिः । गोत्रप्रदेशाः – 'एको गोत्रे' (४. १. ९३/१०९३) इत्येवमादयः ॥

## जीवति तु वंश्ये युवा । (१६३/१०९०)

अभिजनप्रबन्धो वंशः । तत्र भवो वंश्यः पित्रादिः । तस्मिन् जीवति सति पौत्रप्रभृत्यपत्यं युवसञ्ज्ञं भवति । पौत्रप्रभृतीति च न सामानाधिकरण्येनापत्यं विशेषयति, किं तर्हि, [8]षष्ठ्या विपरिणम्यते पौत्रप्रभृतेर्यदपत्यम् इति । तेन चतुर्थादारभ्य युवसञ्ज्ञा विधीयते । गार्ग्यायणः । वात्स्यायनः । तुशब्दोऽवधारणार्थो युवैव न गोत्रम् इति ॥

## भ्रातरि च ज्यायसि । (१६४/१०९१)

भ्रातरि[9] ज्यायसि जीवति [10]कनीयान् भ्राता युवसञ्ज्ञो भवति पौत्रप्रभृतेरपत्यम् । गार्ग्यस्य द्वौ पुत्रौ, तयोः कनीयान् [11]मृते पित्रादौ वंश्ये भ्रातरि[12] ज्यायसि जीवति[13] युवसञ्ज्ञो भवति । अवंश्यार्थोऽयमारम्भः । पूर्वजाः पित्रादयो वंश्या इत्युच्यते । भ्राता तु न वंश्यः । अकारणत्वात् । गार्ग्ये जीवति, गार्ग्यायणो अस्य कनीयान् भ्राता । वात्स्यायनः । दाक्षायणः । प्लाक्षायणः ॥

---

1. बहुलं नास्ति फ. 2. अहिचुम्बकायनिः नास्ति फ. 3. तत्संनियोगेन नास्ति फ. 4. अगोत्रात् इत्यधिकम् क, अगोत्रत्वात् इत्यधिकम् फ. 5. यस्य ब.क.फ. 6. पौत्रप्रभृतेः नास्ति ब.क. 7. कौन्तिः ब. 8. षष्ठी ब. 9. च इत्यधिकम् फ. 10. सति इत्यधिकम् फ. 11. भ्राता इत्यधिकम् फ, मृतेऽपि ब. 12. च इत्यधिकम् फ. 13. सति इत्यधिकम् फ.